# ॥ શ્રીવિષ્ણોર્નામસ્તોત્રમ્ મહાદેવોક્ત નરસિંહપુરાણે ॥

.. Vishnu stotra by Mahadeva
in Narasimhapurana ..

sanskritdocuments.org

September 11, 2017

# .. Vishnu stotra by Mahadeva in Narasimhapurana ..

## ॥ શ્રીવિષ્ણોર્નામસ્તોત્રમ્ મહાદેવોક્ત નરસિંહપુરાણે ॥

## Sanskrit Document Information

Text title : viShNurnAmastotrashivokta narasimhapurANe

File name : viShNornAmastotramahAdevoktaNP.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 40

Latest update : June 6, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

શ્રીમહાદેવ ઉવાચ –

વિષ્ણુર્જિષ્ણુર્વિભુર્દેવો યજ્ઞેશો યજ્ઞપાલકઃ ।
પ્રભવિષ્ણુર્ગ્રસિષ્ણુશ્ચ લોકાત્મા લોકપાલકઃ ॥ ૧॥

કેશવઃ કેશિહા કલ્પઃ સર્વકારણકારણમ્ ।
કર્મકૃદ વામનાધીશો વાસુદેવઃ પુરુષ્ટુતઃ ॥ ૨॥

આદિકર્તા વરાહશ્ચ માધવો મધુસૂદનઃ ।
નારાયણો નરો હંસો વિષ્ણુસેનો હુતાશનઃ ॥ ૩॥

જ્યોતિષ્માન્ દ્યુતિમાન્ શ્રીમાન્ આયુષ્માન્ પુરુષોત્તમઃ ।
વૈકુણ્ઠઃ પુણ્ડરીકાક્ષઃ કૃષ્ણઃ સૂર્યઃ સુરાર્ચિતઃ ॥ ૪॥

નરસિંહો મહાભીમો વજ્રદંષ્ટ્રો નખાયુધઃ ।
આદિદેવો જગત્કર્તા યોગેશો ગરુડધ્વજઃ ॥ ૫॥

ગોવિન્દો ગોપતિર્ગોપ્તા ભૂપતિર્ભુવનેશ્વરઃ ।
પદ્મનાભો હૃષીકેશો વિભુર્દામોદરો હરિઃ ॥ ૬॥

ત્રિવિક્રમસ્ત્રિલોકેશો બ્રહ્મેશઃ પ્રીતિવર્ધનઃ ।
વામનો દુષ્ટદમનો ગોવિન્દો ગોપવલ્લભઃ ॥ ૭॥

ભક્તિપ્રિયોઽચ્યુતઃ સત્યઃ સત્યકીર્તિર્ધ્રુવઃ શુચિઃ ।
કારુણ્યઃ કરુણો વ્યાસઃ પાપહા શાન્તિવર્ધનઃ ॥ ૮॥

સંન્યાસી શાસ્ત્રતત્ત્વજ્ઞો મન્દારગિરિકેતનઃ ।
બદરીનિલયઃ શાન્તસ્તપસ્વી વૈદ્યુતપ્રભઃ ॥ ૯॥

ભૂતાવાસો ગુહાવાસઃ શ્રીનિવાસઃ શ્રિયઃ પતિઃ ।
તપોવાસો દમો વાસઃ સત્યવાસઃ સનાતનઃ ॥ ૧૦॥

પુરુષઃ પુષ્કલઃ પુણ્યઃ પુષ્કરાક્ષો મહેશ્વરઃ ।
પૂર્ણઃ પૂર્તિઃ પુરાણજ્ઞઃ પુણ્યજ્ઞઃ પુણ્યવર્દ્ધનઃ ॥ ૧૧॥

શઙ્ખી ચક્રી ગદી શાર્ઙ્ગી લાઙ્ગલી મુશલી હલી ।
કિરીટી કુણ્ડલી હારી મેખલી કવચી ધ્વજી ॥ ૧૨॥

જિષ્ણુર્જેતા મહાવીરઃ શત્રુઘ્નઃ શત્રુતાપનઃ ।
શાન્તઃ શાન્તિકરઃ શાસ્તા શઙ્કરઃ શંતનુસ્તુતઃ ॥ ૧૩॥

સારથિઃ સાત્ત્વિકઃ સ્વામી સામવેદપ્રિયઃ સમઃ ।
સાવનઃ સાહસી સત્ત્વઃ સમ્પૂર્ણાંશઃ સમૃદ્ધિમાન્ ॥ ૧૪॥

સ્વર્ગદઃ કામદઃ શ્રીદઃ કીર્તિદઃ કીર્તિનાશનઃ ।
મોક્ષદઃ પુણ્ડરીકાક્ષઃ ક્ષીરાબ્ધિકૃતકેતનઃ ॥ ૧૫॥

સ્તુતઃ સુરાસુરૈરીશ પ્રેરકઃ પાપનાશનઃ ।
ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમોંકારસ્ત્વમગ્નયઃ ॥ ૧૬॥

ત્વં સ્વાહા ત્વં સ્વધા દેવ ત્વં સુધા પુરુષોત્તમ ।
નમો દેવાદિદેવાય વિષ્ણવે શાશ્વતાય ચ ॥ ૧૭॥

અનન્તાયાપ્રમેયાય નમસ્તે ગરુડધ્વજ ।
માર્કણ્ડેય ઉવાચ
ઇત્યેતૈર્નામભિર્દિવ્યૈઃ સંસ્તુતો મધુસૂદનઃ ॥ ૧૮॥
ઉવાચ પ્રકટીભૂત્વા દેવાન્ સર્વાનિદં વચઃ ।
ઇતિ ।

નરસિંહપુરાણ અધ્યાય ૪૦ સ્તોત્રસંખ્યા ૬૧
શ્રીનરસિંહપુરાણે વિષ્ણોર્નામસ્તોત્રં નામ ચત્વારિંશોऽધ્યાયઃ ॥ ૪૦॥

From Narasimhapurana adhyAya 40
https://archive.org/details/NarsimhaPuranGitapress (pdf pages 135-136)

Proofread by Singanallur Ganesan singanallur at gmail.com

.. Vishnu stotra by Mahadeva in Narasimhapurana ..
Searchable pdf was typeset using generateactualtext feature of XeLaTeX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*